# MT

Seat No. | | | | | | | |

2018 .... .... 1100

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - I**
**PAPER - VI**

**Time : 2 Hours** **(Pages 8)** **Marks : 50**

---

## प्रथमः विभागः - सुगमसंस्कृतम् ।

**प्र.१ अ) चित्रं दृष्ट्वा नामानि लिखत । (५ तः ४)** ४

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| १ | मरीचिका  | २ |  | ३ |  | ४ |  | ५ |  |
| | | | | | | | | | |

**प्र.१ आ) सङ्ख्याः अक्षरैः अङ्कैः वा लिखत । (३ तः २)** २

१. एकषष्टिः -
२. १८ -
३. ८८ -

**प्र.१ इ) स्तम्भमेलनं कुरुत । (५ तः ४)** २

| | अ | ब |
|---|---|---|
| १. | पञ्चोन - दशवादनम् | ०८:३० |
| २. | सपाद - पञ्चवादनम् | ०८:४५ |
| ३. | सार्ध - अष्टवादनम् | ०५:१५ |
| ४. | पादोन - नववादनम् | १२:३० |
| ५. | सार्ध - द्वादशवादनम् | ०९:५५ |

**प्र.१ ई) वासर - तालिकां पूरयत । (केऽपि २)** २

| प्रपरह्यः | | ________ | | ह्यः |
|---|---|---|---|---|
| ________ | ← | बुधवासरः | ← | ________ |

## द्वितीयः विभागः - गद्यम् ।

**प्र.२ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

एकस्मिन् दिने शङ्करः स्नानार्थं पूर्णानदीं गतः । यदा सः स्नाने मग्नः तदा तत्र एकः नक्रः आगतः । नक्रः झटिति तस्य पादम् अगृह्णात् । तदा शङ्करः उच्चैः आक्रोशत्। ''अम्ब ! त्रायस्व । नक्रात् त्रायस्व !'' आक्रोशं श्रुत्वा नदीतीरं प्राप्ता आर्याम्बा पुत्रं नक्रेण गृहीतमपश्यत् । भयाकुला सा अपि रोदनम् आरभत । शङ्करः मातरम् आर्ततया प्रार्थयत - ''अम्ब, इतः परम् अहं न जीवामि । मरणात् पूर्वं संन्यासी भवितुम् इच्छामि । अधुना वा देहि अनुमतिम् ।'' चेतसा अनिच्छन्ती अपि विवशा माता अवदत् - ''वत्स, यथा तुभ्यं रोचते तथैव भवतु । इदानीमेव संन्यासं स्वीकुरु । मम अनुमतिः अस्ति'' इति । तत्क्षणमेव आश्चर्यं घटितम् । दैववशात् शङ्करः नक्राद् मुक्तः । स नदीतीरम् आगत्य मातुः चरणौ प्राणमत् ।

अनन्तरं शङ्करः मातरं संन्यासस्य महत्त्वम् अवाबोधयत् । संन्यासी न केवलम् एकस्याः पुत्रः। विशालं जगद् एव तस्य गृहम् । 'मातः, यदा त्वं स्मरिष्यसि तदा एव त्वत्समीपमागमिष्यामि' इति मात्रे प्रतिश्रुत्य सः गृहात् निरगच्छत् । ततः गोविन्दभगवत्पादानां शिष्यो भूत्वा सः सर्वाणि दर्शनानि अपठत् । तेभ्यः संन्यासदीक्षां गृहीत्वा वैदिकधर्मस्य स्थापनार्थं प्रस्थानम् अकरोत् ।

**१. अवबोधनम् । ( ४ तः ३ )**

**क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।** १

आर्याम्बा रोदनम् आरभत ।

(अ) शङ्करं नक्रेण गृहीतं दृष्ट्वा सा भीता जाता ।

(ब) नक्रः तस्याः पादम् अगृह्णात् ।

**ख) कः कं वदति ।** १

इतः परम् अहं न जीवामि ।

**ग) पूर्णवाक्येन उत्तरं लिखत ।** १

शङ्करः संन्यासदीक्षां गृहीत्वा किम् अकरोत्?

**घ) वाक्यं पुनर्लिखित्वा सत्यम् /असत्यम् इति लिखत ।** १

आर्याम्बा वैदिकधर्मस्य स्थापनार्थं प्रस्थानम् अकरोत् ।

**२. शब्दज्ञानम् । (३ तः २)**

**क) तृतीया - विभक्त्यन्तपदानि चित्वा लिखत ।** १

**ख) विशेषण-विशेष्य-मेलनं कुरुत ।** १

| विशेषणम् | विशेष्यम् |
|---|---|
| विवशा<br>विशालम् | दर्शनम्<br>माता<br>जगत् |

**ग) लकारं लिखत ।** १

नक्रात् त्रायस्व ।

**प्र.२ आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

भारतस्य दक्षिणदिशि केरलप्रदेशे आलुवा नगरस्य समीपं 'कालडि' नाम ग्रामः । सः ग्रामः पूर्णानदीतीरे वर्तते । अत्र जगद्गुरोः शङ्कराचार्यस्य जन्म ख्रिस्ताब्दे अष्टमे शतके अभवत् । तस्य पिता शिवगुरुः माता आर्याम्बा चास्ताम् । बाल्ये एव तस्य पिता शिवगुरुः दिवङ्गतः । तस्माद् मातैव पुत्रस्य पालनम् अकरोत् । पञ्चमे वयसि उपनीतः सः पठनार्थं गुरुमुपागच्छत् । तत्र वेद-वेदाङ्गानि, विविधशास्त्राणि च असाधारणवेगेन बालकोऽयम् अधीतवान् । पठनादिकं समाप्य शङ्करः गृहं प्रत्यागतवान् । गृहं प्राप्य मातृसेवाम् आरभत च । माता आर्याम्बा पुत्रस्य विवाहविषये सदैव चिन्तयति स्म । परन्तु मनसा वचसा कर्मणा च विरक्तः शङ्करः संन्यासार्थम् अनुमतिं प्रार्थयत । शङ्करस्य ऐहिकविषयेषु अरुचिं दृष्ट्वा आर्याम्बा चिन्तामग्ना जाता ।

**१. अवबोधनम् । ( ४ तः ३ )**

**क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।** १

१) पठनादिकं समाप्य शङ्करः ...... प्रत्यागतवान् । (गृहं / नदीं)

२) ......... वयसि उपनीतः सः पठनार्थं गुरुम् उपागच्छत् । (पञ्चमे / दशमे)

**ख) पूर्णवाक्येन उत्तरं लिखत ।** १

शङ्कराचार्यस्य जन्म कदा अभवत् ?

**ग) वाक्यं पुनर्लिखित्वा सत्यम् /असत्यम् इति लिखत ।** १

शङ्करः अतीव प्रज्ञावान् बालकः।

**घ) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?** १

२. **स्थानाधारेण शब्दपेटिकां पूरयत ।** २

(कालडीग्रामः, केरलप्रदेशः, भारतदेशः, आलुवानगरम्)



**प्र.२ इ) गद्यांशं पठित्वा माध्यमभाषया सरलार्थं लिखत । (२ तः १)** ४

१. (रङ्गमञ्चे - कीर्तनकारः कीर्तनं करोति, श्रोतृवृन्दः श्रवणे मग्नः ।)

कीर्तनकारः - गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धुकावेरि पृथिव्यां सन्निधिं कुरु ।।
ज्येष्ठमासे शुक्लपक्षे दशम्यां तिथौ गङ्गादशहरापर्वप्रारम्भः । अस्मिन् पर्वणि नदीपूजनं कर्तव्यम् ।

श्रोतृवृन्दः - नदीपूजनम् ? किमर्थं नदीपूजनम् ?

कीर्तनकारः - नदी खलु जीवनदायिनी । अतः अस्मिन्नवसरे कृतज्ञतां प्रदर्शयितुं जनाः जले दीपदानं कुर्वन्ति । द्रोणे दीपं प्रज्वाल्य नदीजले समर्पयन्ति ।

२. कीर्तनकारः - एवं विश्वामित्रः नद्यौ प्रीणयित्वा परतीरं गतवान् । अयि श्रोतारः इत्थं नद्यः मानवाः च परस्परं प्रीणयन्तः संस्कृतिं संवर्धितवन्तः ।
प्रवाहिता तरङ्गिणी संस्कृतिर्विकासिता ।
प्रमुदिताश्च मानवाः सरित्कृपासमुन्नताः ।।
नन्दिताः कृषीवलाः प्रफुल्लिता वसुन्धरा ।
अन्नदाननिर्भरा सस्यशामला धरा ।।
सेतुबन्धरोधितं नियन्त्रितं नदीजलम् ।
जनित्रमत्र चालितं जीवनं प्रकाशितम् ।।

**प्र.२ ई) माध्यमभाषया उत्तरं लिखत । (२ तः १)** २

१) विश्वामित्र : नद्यौ किं प्रार्थयते ?

२) मानवानां जीवनं नदीनां साहाय्येन कथं समृद्धं जातम् ?

**तृतीयः विभागः - पद्यम् ।**

**प्र.३ अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत । (५ तः ४)**

अयं न भक्तो न च पूजको वा
घण्टां स्वयं नादयते तथापि ।
धनं जनेभ्यः किल याचतेऽयं
न याचको वा न च निर्धनो वा ॥
रामाभिषेके जलमाहरन्त्या हस्तात् सृतो हेमघटो युवत्याः ।
सोपानमार्गेण करोति शब्दं ठंठं ठठं ठं ठठठं ठठं ठः ॥

**क) पूर्णवाक्येन उत्तरं लिखत ।** १

कस्याः हस्तात् सुवर्णघटः पतितः?

**ख) जालरेखाचित्रं पूरयत ।** १




**ग) पद्यांशात् प्रथमाविभक्त्यन्तपदानि चित्वा लिखत ।** १

**घ) सन्धिविग्रहं कुरुत ।** १

१) जलमाहरन्त्या - जलम् + ............... ।

२) पूजको वा - ............... + वा ।

**च) लकारं लिखत ।** १

लोकयानवाहकः जनेभ्यः धनं <u>याचते</u> ।

**प्र.३ आ) श्लोकौ शुद्धौ पूर्णौ च लिखत।** ४

१. कं संजघान .............. शीतम् ॥

२. वैद्यराज .............. धनानि च ॥

**प्र.३ इ) माध्यमभाषया सरलार्थं लिखत। (२ तः १)** २

१. यथा प्रकाशयत्येको भानुर्भुवनमण्डलम् ।
धर्मान् प्रकाशयत्येकस्तथा मानवतागुणः ॥

२. आत्मौपम्यं समाश्रित्य मानवो मानवैः सह ।
यदा व्यवहरेल्लोके तदा मानवता भवेत् ॥

**प्र.३ ई) माध्यमभाषया उत्तरं लिखत। (२ तः १)** २

१. 'वैद्यराज नमस्तुभ्यम्' अस्य श्लोकस्य स्पष्टीकरणं माध्यमभाषया लिखत।

२. 'रामाभिषेके जलमाहरन्त्या.....' अस्य श्लोकस्य स्पष्टीकरणं माध्यमभाषया लिखत ।

## चतुर्थः विभागः - लेखनकौशलम् ।

**प्र.४ निर्दिष्टाः कृतीः कुरुत। (३ तः २)**

**अ) उपपदविभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत। (४ तः २)** २

१. गम् - गच्छ् →

२. दा - यच्छ् →

३. रुच् →

४. कथ् →

**आ) अनुवादं कुरुत। (४ तः २)** २

१. India is my country.

२. The colour of the sky is blue.

३. This is my favourite book.

४. Children play in the water.

**इ) अमरकोषात् समानार्थकं शब्दं योजयित्वा वाक्यं पुनर्लिखत। (४ तः २)** २

१. त्वं प्रजाहितदक्षः राजा ।

२. मृगः वने वसति ।

३. सुदामा श्रीकृष्णस्य मित्रम् ।

४. पादपः परोपकाराय फलति ।

पञ्चमः विभागः - भाषाभ्यासः ।

**प्र.५ अ) पृथक्करणम् ।**

**१. नामानि सर्वनामानि च पृथक्कुरुत । (५ तः ४)** २

( मात्रे, तुभ्यम्, यः, मखे, पन्नगः )

| नाम | सर्वनाम |
|---|---|
| | |

**२. क्रियापदानि धातुसाधित-विशेषणानि च पृथक्कुरुत । (५ तः ४)** २

( वदन्, याचते, सृतः, अजायत, रन्तव्यः )

| क्रियापदम् | धातुसाधित-विशेषणम् |
|---|---|
| | |

**प्र.५ आ) निर्दिष्टाः कृतीः कुरुत । (४ तः २)**

**१) सङ्ख्या / क्रम / आवृत्तिवाचकस्य योग्यं पर्यायं चित्वा वाक्यं पुनर्लिखत । (३ तः २)** २

१. तेन ............ प्रयोगः कृतः । (त्रयः / त्रिः)

२. ............ भवने योगेशः निवसति । (द्वितीयम् / द्वितीये)

३. ............ वेदाः वर्तन्ते । (चत्वारः / चतुरः)

**२) समासविग्रहानां समासनामभिः सह मेलनं कुरुत । (६ तः ४)** २

| | समासविग्रहाः | समासनामानि |
|---|---|---|
| १. | जीर्णवस्त्रं धारयति इति । | सप्तमी - तत्पुरुषः समासः । |
| २. | भयेन आकुला । | अव्ययीभावः समासः । |
| ३. | न आगतम् । | तृतीया - तत्पुरुषः समासः । |
| ४. | उचितम् अनुसृत्य । | नञ् - तत्पुरुषः समासः । |
| ५. | प्रजाहिते दक्षः । | कर्मधारयः समासः । |
| ६. | गङ्गा नाम नदी । | उपपद - तत्पुरुषः समासः । |

**३) समानार्थकं - विरुद्धार्थकं शब्दं लिखत । (४ तः २)** २

१. हेम - २. शब्दः -

३. पुरतः × ४. दिनकृत् -

( मञ्जूषा - भानुः, नादः, कनकम्, पृष्ठतः )

**४) योग्यं पर्यायं चिनुत । (३ तः २)** २

क. यमः प्राणान् हरति । (कर्तृवाच्यम् / कर्मवाच्यम्)

ख. भवान् ......... । (स्वीकुरु / स्वीकरोतु)

ग. विशालं .............. एव तस्य गृहम् । (जगम् / जगत्)

**शुभं भवतु ✌**